**अनुविद्** 6 U. 1 To find, discover, see, obtain. -2 To deem, consider. -3 To marry.

**अनुवित्त** *a.* Found, obtained; यस्यानुवित्तः प्रतिबुद्ध आत्माऽस्मिन् सन्देह्ये गहने प्रविष्टः Bri. Up. 4. 4. 13. अयं पन्था अनुवित्तः पुराणः Ait. Br.

**अनुवित्तिः** *f.* Finding, obtaining.

**अनुविध** *a.* One who imitates, a devotee दृतय इव श्वसन्त्यसुभृतां यदि तेऽनुविधा Bhāg. 10. 87. 17.

**अनुविद्ध** See under अनुव्यध्.

**अनुविधा** 3 U. 1 To lay down a rule, regulate. -2 To obey, act up to, follow, conform to; See अनुविधायिन्; पदमनुविधेयं च महताम् Bh. 2. 28 the foot-steps of the great have to be trodden in. -3 To resemble, imitate. *-pass.* To be trained to follow rules; obey.

**अनुविधानम्** 1 Obedience. -2 Acting in conformity to (orders &c.).

**अनुविधायिन्** *a.* 1 Obedient, submissive, compliant, conforming to orders; सा स्त्री याऽनुविधायिनी H. 2. 130; भवितव्यानुविधायीनीन्द्रियाणि V. 3. -2 Resembling; निजवधूश्वसितानुविधायिनि Śi. 6. 23, 15. 96.

**अनुविहित** *a.* Obedient; तस्यानुविहितोऽनाथा Bhāg. 1.9.17.

**अनुविनश्** 4 P. To disappear, vanish or perish after or along with another. विज्ञानघन एव एतेभ्यो भूतेभ्यः समुत्थाय, तान्येवानुविनश्यति Bri. Ā. 2. 4 12.

**अनुविनाशः** Perishing after.

**अनुविश्** 6 P. To enter or go after, follow.

**अनुवेशः, -शनम्** 1 Following, entering after. -2 Marriage of a younger brother before the elder is married; (ज्येष्ठातिक्रमेण कनिष्ठस्य विवाहः); यवीयसोऽनुवेशो हि ज्येष्ठस्य विधिलोपकः Mb.

**अनुवेश्य** *a.* [अनुक्रमेण वेशमर्हति, यत्] A next-door neighbour.

**अनुविश्वः** (pl.) N. of a people in the north-east. Bri. S.

**अनुविषयः** Taste; अपश्यन्तोऽनुविषयं भुञ्जते विघसाशिनः Mb. 12. 287. 40.

**अनुविष्टम्भः** Being obstructed in consequence of.

**अनुवृत्** 1 A. (sometimes P. also) 1 (Transitively uesd) (*a*) To go or roll after, follow, pursue; (fig.) to follow, conform to, act according to, obey, adapt oneself to, be guided by; humour; अहं तावत्स्वामिनश्चित्तवृत्तिमनुवर्तिष्ये Ś. 2; तेऽपि परिचयमनुवर्तन्ते K. 289; किमत्र चित्रं यदि विशाखे शशाङ्कलेखामनुवर्तेते Ś. 3 approve of her choice; लौकिकानां हि साधूनामर्थं वागनुवर्तते U. 1. 10 words conform to the sense; न कुलक्रममनुवर्तते K. 104 follow; मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः Ku. 3. 36 followed his mate in drinking, drank after her; (जननीम्) अत्यन्तशुद्धहृदयामनुवर्तमानाम् Bh. 2. 110; मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः Bg. 3. 23; Dk. 80, 96, 126; कृतज्ञतामनुवर्तमानेन Mu. 3 following the path of gratitude; प्रभुचित्तमेव हि जनोऽनुवर्तते Śi. 15. 41; Māl. 3. 2. (*b*) To imitate, resemble; equal; तेऽन्ववर्तन् पितॄन्सर्वे यशसा च बलेन च Mb. (*c*) To gratify, humour, please; Dk. 65. (*d*) To serve, worship; पञ्चवर्षसहस्राणि सूर्यं चैवान्ववर्तत Rām. 7. 10. 8. -2 (Intransitively used) (*a*) To follow, come after; संप्राह्य इत्यनुवर्तते H. 3. (*b*) To continue, endure. (*c*) To act towards, behave. (*d*) (In gram.) To be repeated or supplied from a preceding rule, Sūtra or assertion (said of a word or rule which continues to exercise influence on what follows); *e. g.* in भक्तिः P. IV. 3. 95; सोऽस्य (occurring in Sūtra 89 before) इत्यनुवर्तते Sk. *-Caus.* 1 To cause to revolve, turn round; एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः Bg. 3. 16. -2 To act up to, follow, obey; तथापि लोकयात्रानुवर्तनीया Mv. 7; पुत्रैः पितरौ लोकद्वयेप्यनुवर्तनीयाः Ve. 3; K. 367. -3 To favour, oblige; comply with one's request; विधिनापि भवतेव वयमनुवर्तिताः K. 73; यथाचित्तमनुवर्तनीयः Māl. 7. -4 To put in, carry out. -5 To repeat or supply from a preceding Sūtra; केचित्तु विजायते इति नानुवर्तयन्ति P. V. 2. 13. Sk. -6 To use, employ. -7 To lead one to, attach to. -8 To speak in favour of, speak for; to approve. -9 To imitate, do after one; सतां चरितान्यनुवर्तितानि नेन्द्रियाणि K. 298.

**अनुवर्तनम्** 1 Following (fig. also); attending, compliance, obedience, conformity; प्रकृतस्यानुवर्तने Ak.; इदमाश्चर्यमथवा लोकस्थित्यनुवर्तनम् Mv. 7. 4; दाक्षिण्य° Dk. 161. -2 Gratifying, obliging. -3 Approval of, concurrence in. -4 Continuance; result, consequence. -5 Supplying from a preceding Sūtra.

**अनुवर्तिन्** *a.* 1 Following, obeying, conforming to, with acc. or in comp.; कश्च लक्ष्मणमुक्तानां रामकोपानुवर्तिनाम्। शराणामग्रतः स्थातुं शक्तो देवासुरेष्वपि ॥ Rām. 5. 51. 19. राक्षसाश्चापि गृह्यन्ते नित्यं छन्दानुवर्तिभिः Pt. 1. 69; नराधिपा नीचजनानुवर्तिनः 1. 383. -2 Guided by, following the advice of; obedient, faithful, compliant; अनुवर्तिनि कलत्रे Pt. 1. 101, भृत्यानामनुवर्तिनाम् 298. -3 Like, resembling, worthy.

**अनुवर्त्मन्** *a.* [अनुगतो वर्त्म] Following, attending.

**अनुवृत्त** *p. p.* 1 Obeying, following &c. स मेरुमनुवृत्तः स पुनर्गच्छति पाण्डव Mb. 3. 163. 31. -2 Uninterrupted, continuously kept up, continued; अनुवृत्तस्त्वया भगीरथगृहे प्रसादः U. 7. -3 Rounded off; taperingly round (क्रमशः वर्तुलाकार); सुपत्रमनुवृत्ताङ्गं सुपर्वाणं सुसंस्थितम् Rām. 6. 90. 65. दीर्घानुवृत्तपीनबाहुना K. 179. -4 Supplied from a preceding rule &c. -5 Conforming to the character (शीलानुगत). **-त्तम्** Obedience, conformity, compliance; मूर्खं छन्दोऽनुवृत्तेन (गृह्णीयात्) Chāṇ. 33.

**अनुवृत्तिः** *f.* 1 Assenting to, approval; तवानुवृत्तिं न च कर्तुमुत्सहे Ku. 5. 65. -2 Obedience, conformity, following, continuance in (opp. व्यावृत्ति); taking up; continuity; ज्येष्ठानुवृत्तिजटिलम् R. 13. 78 by following the example of;